संस्कृत-वार्ता:

19.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- श्व: अष्टराज्यानां केन्द्रशासितप्रदेशानाञ्च एकोनपञ्चाशत् लोकसभासनेभ्य: पञ्चमचरणीय मतदानाय सर्वविधसन्नद्धता: प्रवर्तिता: सन्ति।
- अवशिष्टचरणद्वयस्य मतदानाय प्रचाराभियानं सजवं प्रवर्तते, प्रधानमन्त्रिणा भाजपेति दलनेत्रा नरेन्द्रमोदिना झारखण्डपश्चिम-बङ्गयो: नैर्वाचनिकसभा: सम्बोधिता:।
- राष्ट्रियवञ्चितायोगेन उदीरितं यत् अनुसूचितजातिवर्गान्तर्गत-छात्राणां नामाङ्कनं चतुर्दशोत्तरद्विसहस्रतवर्षस्य तुलनायां चतुश्चत्वारिंशत्प्रतिशतम् प्रवर्धितमस्तीति।
- बैंकाक नगरे प्रवर्तमानायां थाइलैंड ओपन बैडमिण्टन इति स्पर्धायाम् अद्य पुरुषयुगलवर्गस्य अंतिमचक्रं चिरागशेट्टी सात्विकसांईराज रंकी रेड्डी च विजितवन्तौ।
- शारजाह-नगरे प्रचलिष्यमाणायां चतुरङ्ग-प्रतिस्पर्धायां भारतीय-चतुरङ्ग-क्रीडक: अरविन्द-चितंबरम् स्थानीय-चतुरङ्ग-क्रीडकम् ए.आर. सालेह-सलेम-इत्यमुं सार्ध-चतुरङ्कै: पराजितवान्।

<u>पञ्चमचरणीय मतदानम्</u>

लोकसभा निर्वाचनस्य पञ्चमचरणीय मतदानाय सर्वाः सज्जाः सम्पूरिताः सन्ति, मतदानञ्च श्वः भविष्यति। अस्मिन् चरणे द्वयोः केन्द्रशासित प्रदेशयोः अपिच षड् राज्यानां एकोनपञ्चाशत् लोकसभाक्षेत्रेभ्य: मतदानं भविष्यति। पञ्चम-चरणेऽस्मिन् उत्तर-प्रदेशस्य चतुर्दश आसनेभ्यः, महाराष्ट्रस्य त्रयोदश आसनेभ्यः, पश्चिम-बङ्गालस्य सप्त आसनेभ्यः, बिहार- ओडिसा-राज्ययोः प्रत्येकं पञ्च आसनेभ्यः, झारखण्डस्य आसनत्रयाय, जम्मू-कश्मीर- लद्दाखयोः च प्रत्येकं एकैकाय लोकसभासनाय मतदानं भविष्यति। चरणेऽस्मिन् प्रमुखाभ्यर्थित्वेन केन्द्रीयमन्त्रिणः भारतीयजनतापार्टीति दलस्य वरिष्ठनेतारश्च सन्ति। येषु राजनाथसिंहः, स्मृति ईरानी, पीयूषगोयलः, काङ्ग्रेसस्य राहुलगान्धी, के. एल. शर्मा, नेशनल कांफ्रेंस इत्यस्य उमर अब्दुल्ला एवं लोक जनशक्ति पार्टीति दलस्य (रामविलास-वर्गस्य) चिराग-पासवानोऽपि वर्तते। मतदानमिदं प्रातःकाल सप्त-वादनात् आरभ्य सायं षड्वादनं यावत् प्रचलिष्यति। ओडिशा विधानसभायाः पञ्चत्रिंशत् विधानसभासनेभ्य: अपि श्वः एव मतदानं भविष्यति।

झारखण्ड-प्रचारः

प्रधानमन्त्री भारतीय जनता पार्टीति दलस्य वरिष्ठ नेता च श्रीनरेन्द्रमोदी अद्य झारखण्डस्य जमशेदपुरक्षेत्रे निर्वाचनसभां सम्बोधयति। अस्मात् आसन्दात् मुख्य-प्रतिस्पर्धी-रूपेण भाजपायाः विद्युतवरणमहतो अथ झारखण्डमुक्तिमोर्चासमर्थितस्य I.N.D.I. संघटनस्य प्रत्याशी समीरमोहंती इत्येतयोर्मध्ये अस्ति, यश्च बहारागौडा-नगरस्य वर्तमानविधायकः अस्ति। श्रीमहतो च जमशेदपुर संसदीय क्षेत्रतः वर्तमान सांसदः, तृतीयवारं प्रत्याशीभूतोऽस्ति। पञ्चमे चरणे चतरा, कोडरमा, हजारीबाग लोकसभासन्दानां, गान्धीविधानसभासन्दस्य च उपनिर्वाचनानां प्रचारः गतसायंकाले एव समाप्तः। एतेषां आसनानां कृते आहत्य चतुःपञ्चाशत् (५४) अभ्यर्थिनः प्रत्याशीभूताः सन्ति ।

ओबीसीति वंचितवर्गस्य

ओबीसीति वंचितवर्गस्य राष्ट्रियायोगस्य प्रतिवेदनानुसारं देशे अनुसूचितजातिवर्गे अध्ययनं कुर्वतां छात्राणां संख्या चतुर्दशोत्तरद्विसहस्रतमवर्षस्य तुलनायां चतुश्चत्वारिंशत्प्रतिशतमितम् वर्धितमस्ति। पूर्वं एताः संख्याः षड्चत्वारिंशल्लक्षं आसीत्, या द्वाविंशत्युत्तरद्विसहस्रतम-वर्षे संवर्ध्य षट्षष्टिः लक्षं यावत् सञ्जातास्ति। अल्पसंख्यकमहिलाच्छात्राणां संख्या अपि चतुर्दशोत्तरद्विसहस्रतमवर्षस्य तुलनायां द्विचत्वारिंशत् प्रतिशतमितम् वर्धितमस्ति । अपरत्र अनुसूचितजातीयानां महिलाच्छात्राणां संख्यायां एकपञ्चाशत्प्रतिशतमिता वृद्धिः सञ्जातास्ति। अनुसूचितजनजातिछात्राणां नामाङ्कने पञ्चषष्टिः प्रतिशताधिकम् वृद्धिः च अभवत्। एकं प्रतिवेदनानुसारं एकविंशत्युत्तरद्विसहस्रतमे वर्षे अन्य वंचित-वर्गस्य छात्राणां कृते सप्तविंशतिः प्रतिशतं आरक्षणानन्तर्गतं चतुस्त्रिंशत्-सहस्राधिकानां बालकानां प्रवेश: सञ्जातोऽस्ति। राष्ट्रियसंस्थानेषु अन्य वंचितवर्गाणां नामाङ्कनेषु च एकसप्ततिः प्रतिशतमितायाः वृद्धिः सञ्जातास्ति तथा च एतेषु महिलानां संख्या संवर्ध्य द्विगुणिता च जातास्ति।

जम्मू-कश्मीर आतङ्कवादी आक्रमणम्

ह्यः जम्मू-कश्मीरस्य शोपियान्-अनन्तनाग-मण्डलयोः आतङ्कवादिभिः एक: पूर्वग्रामप्रधान: गोलिकाभिः निहत:, एकश्च जयपुरतः भ्रमणार्थमागतः दम्पत्ति: व्रणित:। प्रथमा घटना शोपियाँनगरे अभवत्, यत्र आतङ्कवादिनः पूर्वग्रामप्रधानस्य एजाजशेखस्य उपरि अन्धविवेकीरूपेण गोलिकाप्रहारं कृतवन्तः। श्रीमत: शेखस्य चिकित्सालये एव मृत्युः अभवत् । अनन्तनाग-मण्डले च आतङ्कवादिनः जयपुरतः आगतौ द्वौ जनौ गोलिकाभिः घातितवन्त:, यौ हि गभीरपरिस्थितौ चिकित्सालयं प्रवेशितौ। एतयो: घटनयो: अनन्तरं सम्पूर्णं क्षेत्रं मेखलीकृत्य अन्वेषणं क्रियते। अनन्तनाग-राजौरी-संसदीयक्षेत्रे नैर्वाचनिकप्रचारः प्रचलति। श्वः बारामुलाक्षेत्रे मतदानं भविष्यति।

ऋतु विज्ञान-विभाग:

ऋतु विज्ञान-विभागेन आगामिदिनत्रयपर्यन्तं देशस्य दक्षिणभागे प्रचण्डवृष्टिः भविष्यतीति पूर्वानुमानं कृतमस्ति। दक्षिणप्रायद्वीपीयक्षेत्रेषु आगामिषु पञ्च(५) दिवसेषु अपि अत्यधिकवृष्टिः भवितुं शक्नोति। अस्य मासस्य एकविंशतिः दिनाङ्कपर्यन्तं तमिलनाडु-केरल-प्रदेशयोः कतिपय-स्थानेषु अधिकवृष्टिः भवितुमर्हति। आगामिषु अष्टचत्वारिंशत्(४८) होरासु दक्षिण-अण्डमान-सागरं, दक्षिणपूर्व-बङ्ग-खातेः, कतिपय-द्वीपानां च भागं प्रति वर्षर्तोः आगमनस्य सम्भावना अस्ति। केरलस्य पत्तनमथिट्टा, कोट्टायम्, इडुक्की, मलप्पुरम् जनपदेषु अद्य काषाय सञ्चेतना प्रसारितास्ति, अत्र प्रबलवर्षायाः सम्भावना वर्तते। अनेन सहैव नव अन्य-जनपदेषु अपि पीत-सञ्चेतना प्रसारिता अस्ति। ऋतु-विज्ञान-विभागेनोक्तं यत् श्वः आरभ्य राज्ये इतोऽपि तीव्र-वृष्टेः सम्भावना अस्ति। एतदालक्ष्य मत्स्यजीविभ्यः समुद्रं प्रति न गमनस्य परामर्शः प्रदत्तोऽस्ति।

बैडमिण्टन

बैंकाक नगरे प्रवर्तमानायां थाइलैंड ओपन बैडमिण्टन इति स्पर्धायाम् अद्य पुरुषयुगलवर्गे अंतिमचक्रे चिरागशेट्टी सात्विकसांईराज रंकी रेड्डी च इत्यनयो: दलेन चाइनादेशस्य चेन-बो-यांग ल्यू-ई इत्यनयोःयुगलं पराजितम् ।

आई.पी.एल.क्रिकेट

आई.पी.एल.क्रिकेट-स्पर्धा-मालिकायाम् अद्य सन् राइजर्सहैदराबाद दलेन सह पंजाबकिंग्सदलस्य प्रतिस्पर्धाप्रचलति यत्र पंजाबदलेन पञ्चदशोत्तरद्विशत- धावनाङ्कानां लक्ष्यं स्थापितमस्ति। अद्यैव राजस्थान रॉयल्सदलं कोलकातानाइट्राइडर्सदलं सम्मुखी-करिष्यति। एषा स्पर्धा सायं सार्ध-सप्तवादनात् आरप्स्यते। गतरात्रौ क्रीडितायां स्पर्धायां रॉयल-चैलेन्जर्स-बेंगलुरु-दलेन चेन्नई सुपर्-किंग्स्-दलम् पराजितम्।

चतुरङ्क्रीडा

शारजाह-नगरे प्रचलिष्यमाणायां चतुरङ्ग-प्रतिस्पर्धायां भारतीय-चतुरङ्ग-क्रीडक: अरविन्द-चितंबरम् स्थानीय-चतुरङ्ग-क्रीडकम् ए.आर. सालेह्-सलेम-इत्यमुं सार्ध-चतुरङ्कै: पराजितवान्।

।। इति वार्ता: ।।